# 3. 'राष्ट्रध्वजः'



प्रमोदः - मित्र सुबोध ! चित्रे किं दृश्यते ?

सुबोधः - मित्र प्रमोद ! चित्रे एको ध्वजो दृश्यते ।

प्रमोदः - मित्र ! अयं कस्य देशस्य ध्वजः अस्ति ?

सुबोधः - मित्र ! अयम् अस्माकं राष्ट्रस्य भारतस्य ध्वजः अस्ति। अतः राष्ट्रध्वजः कथ्यते।

प्रमोदः - मित्र सुबोध ! ज्ञातं मया । किमयमेव राष्ट्रध्वजः अस्माकं देशे 'तिरंगा' इति नाम्ना प्रसिद्धिं प्राप्तः ?

सुबोधः - अथ किं मित्र प्रमोद ! अस्मिन् ध्वजे त्रयोरंगाः वर्णाः वा सन्ति । अतः 'तिरंगा' कथ्यते ।



प्रमोदः - मित्र ! अत्र त्रिपट्टिकाः दृश्यते ! तासु त्रीन् वर्णान् पश्यामि । उपरितनः पिण्याकवर्णः (केसरवर्णः) दृश्यते। अयं कस्य भावस्य प्रतीकः वर्तते ।

सुबोधः - मित्र ! पिण्याकवर्णः (केसरवर्णः) त्यागस्य, जागरणस्य, शौर्यस्य च प्रतीको अस्ति ।

प्रमोदः - मित्र ! श्वेतपट्टिकायाः वर्णः कं भावं द्योतयति ।

सुबोधः - मध्यस्थितायाः श्वेतपट्टिकायाः वर्णः सत्यं निर्मलतां च द्योतयति ।

प्रमोदः - मित्र ! अधः स्थितायाः हरितपट्टिकायाः वर्णः कं भावं प्रदर्शयति ?

सुबोधः - मित्र ! अधो भागे विद्यमानायाः हरितपट्टिकायाः वर्णः जीवनसमृद्धिं सुखं च प्रदर्शयति ।

प्रमोदः - मित्र ! अहं श्वेतपट्टिकायाम् एकं चक्रमपि पश्यामि । किञ्च द्योतयति?

सुबोधः - मित्र ! इदम् अशोकचक्रमस्ति एतत् चक्रं गतिशीलतां द्योतयति । राष्ट्रीयपर्वसु राष्ट्रध्वजारोहणं क्रियते । अस्माकं प्रधानमंत्री प्रत्येकमगस्त मासस्य पञ्चदशतारिकायां देहल्याः रक्तदुर्गात् राष्ट्रध्वजोत्तोलनं करोति ।

प्रमोदः - मित्र सुबोध ! अवगतं राष्ट्रध्वजस्य महत्वम् । अयं राष्ट्रध्वजोऽस्माकं सर्वेषां भारतीयानाम् आदरभाजनम्। अयं सर्वेषां भारतीयानां वन्दनीयः ।

सुबोध प्रमोदः च राष्ट्रध्वजं श्रद्धया नमतः स्वगृहम् च गच्छतः ।

## शब्दार्थाः

PD33Q8

| | | |
|---|---|---|
| द्योतयति | - | सूचित करता है । |
| पर्वसु | - | उत्सवों में । |
| राष्ट्रध्वजारोहणम् | - | राष्ट्रध्वज का फहराना । |
| रक्तदुर्गात् | - | लाल किले से । |
| उत्तोलनम् | - | फहराना । |

## अभ्यासः

1. **संस्कृत में उत्तर दीजिए ।**
   क. चित्रे किं दृश्यते?
   ख. ध्वजे कतिवर्णाः सन्ति ?
   ग. श्वेतपट्टिकायाः वर्णः कं भावं द्योतयति ?
   घ. अशोकचक्रं किं द्योतयति ?

2. **रिक्त स्थानों की पूर्ति कीजिए ।**
   क. राष्ट्रध्वजः ............ इति नाम्ना प्रसिद्धम् ।
   ख. राष्ट्रध्वजस्य उपरितनः ............ वर्णः दृश्यते ।

3. **संस्कृत में अनुवाद कीजिए ।**
   क. मैं श्वेत पट्टिका में एक चक्र भी देखता हूँ ।
   ख. राष्ट्रध्वज राष्ट्र की एकता का प्रतीक है ।
   ग. दोनों राष्ट्रध्वज को प्रणाम करते हैं ।

4. **विभक्ति-निर्देश कीजिए ।**
   अस्माकम्, राष्ट्रस्य, रक्तदुर्गात्, सर्वे ।

5. **सन्धि विच्छेद कीजिए ।**
   अथवेयं, ध्वजोत्तोलनम्, ध्वजोऽस्माकम् ।